"द्रव्यत्वं तमसोऽपि शोभनधियां मीमांसकानां मतम् ।"

छायायास्तमसश्चापि सम्बन्धाद्गुणकर्म्मणोः ।
द्रव्यत्वं केचिदिच्छन्ति मीमांसकमताश्रयाः ॥"

इति वैद्यकरानवल्लभक्रतवादार्थदर्पणे प्रथमश्लोके ॥)

पूर्व्वमीमांसासूत्रकर्त्ता जैमिनिः । वृत्तिकर्त्ता कुमारिलभट्टः । भाष्यकर्त्ता शवरस्वामी । प्रभाकरः कुमारिलभट्टस्य छात्रः । स एव गुरुत्वेन भण्यते । तन्मतं गुरुमतम् तच्छिष्याः प्राभाकराः । अतएव स्मार्त्तभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम् । उत्तरमीमांसासूत्रकर्त्ता वेदव्यासः । तस्य भाष्यकर्त्ता शङ्कराचार्य्यः । स च अद्वैतवादी । रामानुजः विशिष्टाद्वैतवादी । माध्वः द्वैतवादी च ॥ (यथा, भक्तिरसामृतसिन्धौ । १ । १ । ३ ।

"मीमांसको वड़वाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वाम् ॥")

मीमांसा, स्त्री, (मानविचारे + "मान् बधदान् शानृभ्यो दीर्घश्चाभ्यासस्य ।" ३।१।६। इति सन् । अः टाप् । अभ्यासस्येकारस्य दीर्घश्च ।) षड्दर्शनान्तर्गतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । विचारणा २ । इति हेमचन्द्रः ।२।१६५॥ अस्या अध्याया विंशतिः । तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्डनिरूपिका । अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभिः बहूनि धर्म्मशास्त्राणि कृतानि । तत्रोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका । अस्या नाम वेदान्तः । अपराध्यायचतुष्टयं सङ्कर्षणप्रणीतं उपासनाकाण्डं षड्दर्शनवहिर्भूतम् ॥ * ॥ प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम् । १ । द्वितीये यागदानादिकर्म्मभेदः । २ । तृतीये प्रयाजादीनां दर्शपूर्णमासार्थकत्वेन तच्छेषत्वम् । ३ । चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्त्या अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्त्येत्येवमादयः । ४ । पञ्चमे क्रमनियतिविधेयत्वादयः । ५ । षष्ठे कर्त्तुरधिकारो नान्धादेरित्यादयः । ६ । सप्तमे समानमितरच्छ्येनेन इत्यादि प्रत्यक्षवचनेनाग्निहोत्रादिनाम्नानुमितवचनेन च सामान्यतोऽतिदेशः ।७। अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापस्तद्धितेन देवतानिर्द्देशः एकदेवतत्त्वमौषधद्रव्यकत्वमित्यादिना लिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतानान्यस्येत्येवमादिविशेषातिदेशः । ८ । नवमे प्रकृतावग्नये जुष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण सूर्य्याय जुष्टं निर्व्वपामीत्येवमादिरूहः । ९ । दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बाधः । १० । एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम् । ११ । द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पशुङ्गपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः । १२ ॥ (एतदध्यायप्रतिपाद्यार्थानां विवरणं यथा,—

'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं मानमीरितम् । द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षकः । तृतीये स्मृतिरूपम् । स्मृतिराचारमप्युपलक्षयति । चतुर्थे उद्भिच्चित्रादिनामरूपम् । द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम् । अपूर्व्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः । तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः ।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता । द्वितीये लिङ्गम् । तृतीये वाक्यप्रकरणादि । चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसद्भावः । पञ्चमे प्रतिपत्तिकर्म्माणि । षष्ठेऽनारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि ।

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षादध्यानयनस्य प्रयोजिकेत्यादि प्रधानप्रयोक्तृत्वं विचारितम् । द्वितीये त्वप्रधानं वत्सापकरणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम् । तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता । चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता ।

पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः । द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादिक्रमविशेषः । तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकादशत्वमित्यादिर्वृद्धिः । अदाभ्यग्रहचित्रिण्योरनावृत्तिरित्यादि वृद्ध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्ब्बलभावः ।

षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः । कर्त्तुरस्त्यन्धादेर्नास्ति स्त्रिया अस्ति । योऽस्ति स च पत्या सहेत्येवमादिनाधिकारी निरूपितः । द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलम् । दर्शपौर्णमासयोः कर्त्तव्यनियमः काम्यकर्म्मसमापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः तृतीये द्रव्यस्य प्रतिनिधिरस्ति । देवादीनामग्न्यादीनामधिकारिणाञ्च स नास्तीत्यादिनिरूपणम् । चतुर्थे पदार्थलोपनं विचारितम् । अवत्तनाशे सत्याज्येन यजेत् । इड़ाद्यर्थनाशे सति शेषान्नग्राह्यमित्यादिकम् । पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम् । ज्योतिष्टोमस्यैकादशोदीक्षाः । द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम् । षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम् । सप्तमे पित्रादिकं न देयम् । महाभूमिर्न देयेत्येवमादिर्देयविचारः । अष्टमे लौकिकाग्नावुपनयनहोमः । स्थपतीष्टिस्त्वग्नावेवेत्येवमाद्यग्निविचारः कृतः ।

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनातिदेशः । द्वितीये पूर्व्वोक्तातिदेशस्य शेषो विचारितः । तृतीयेऽग्निहोत्रनाम्नातिदेशः । चतुर्थे निर्व्वापौषधद्रव्यादिलिङ्गातिदेशः ।

अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः । तद्यथा सौर्य्यचरावतिदेशकानि निर्व्वापस्तद्धितेन देवतानिर्द्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि । द्वितीये स्वस्पष्टैर्लिङ्गैरतिदेशः । तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते तत्र लिङ्गमस्पष्टम् । शीघ्रं तद्बुद्ध्यनुत्पादनात् । तृतीये प्रबलेन लिङ्गेनातिदेशः । तद्यथा । आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु त्रित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदेवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः । प्रबलञ्च द्विदेवत्यत्वम् । शब्दोच्चारणमात्रेण सहसा प्रतिभासात् । क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बलः । चतुर्थे दर्व्विहोमेष्वतिदेशोऽपोद्यते ।

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वकमूहविचारप्रारम्भः । तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ताः । अवघातमन्त्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोपोद्घातः । सवितृत्रिपूषशब्दानां विकृतिषु नास्त्यूहः । अग्निशब्दस्यास्त्यूह इत्यादि ऊहविचारारम्भः । द्वितीये सपरिकरः सामोहः । तृतीये मन्त्रोहः । चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः ।

दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः । तद्यथा स्वयं कृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धननादीनां बाधः । कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः । द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः । तृतीये बाधकारणं कार्य्यैकत्वम् । तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्य्यम् । तथा विकृतिरूपे भूताग्निकाण्डे धेनुरूपाया दक्षिणायास्तदेव कार्य्यम् । ततो धेन्वा गवाश्वादिदक्षिणाविकृतौ चोदकप्राप्ता बाध्यते । चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः । पञ्चमे षोड़शिग्रहः प्रकृतिगामी । स चाग्रयण-